For Dr. M...-ji
with warmest regards and
grateful thanks [illegible signature]

THE *TANTROCCAYA* OF ABHINAVAGUPTA

Abhinavagupta wrote three progressively shorter epitomes of his great Tantric encyclopedya, the *Tantrāloka* (TĀ)[1], in order, as he says in the *Tantrasāra* (TS), to aid those unable to cope with his main work[2]. These are the TS, composed of twenty-two *āhnikas* in prose, each followed by a summary of one or two stanzas, in Sanskrit and in *apabhraṃśa*; the *Tantroccaya* (TU), published here for the first time, composed of ten *āhnikas* in prose, also followed by summarizing stanzas in Sanskrit and in *apabhraṃśa*, and, finally, the *Tantravaṭadhānikā* (TVDh)[3], composed of three *āhnikas* in verse.

These works each fared differently, but, on the whole, they cannot have been read and studied very much, since, despite their author's good intentions, their very brevity makes them hard to understand if one does not have the text of the TĀ (intrinsically difficult itself, but elucidated by Jayaratha's exhaustive commentary) continually to hand. As in the case of most of Abhinavagupta's works, these do not, however, limit themselves to slavishly summarizing the major work, but they each have certain original features, which, when taken together, render the general lines of Abhinavagupta's great work clearer and more intellegible.

The TU, as we said above, consists of ten *āhnikas*. The backbone of the work is made up of a commentary on the final stanzas, in Sanskrit ed in *apabhraṃśa*, of the twenty-two *āhnikas* of the TS. The content of the first five *āhnikas* corresponds to the first five of the TS. The *āhn*. VI summarizes the exposition of the Path of Time and Space, that occupies two *āhnikas* in the TS, VI and VII respectively. The *āhn*. VII, devoted to the *tattvas*, summarizes VIII, IX and X *āhnikas* of the TS. The descent of power and the various kinds of initiation, that occupy ten *āhnikas* (from XI to XIX and XXII)

[1] *The Tantrāloka of Abhinavagupta*. With the Commentary of Jayaratha. Edited by R.C. Dwivedi and N. Rastogi. 8 vols. Delhi 1987.

[2] *The Tantrasāra of Abhinavagupta*. Edited by Mukunda Rām Shastri. Kashmir Series of Texts and Studies, XVII, Srinagar 1918, p. 2 *vitatas tantraloko vigāhituṃ naiva śakyate sarvaiḥ / ṛjuvacanaviracitam idaṃ tu tantrasāraṃ tataḥ śṛṇute //*

[3] *The Tantravaṭadhānikā of Abhinavagupta*. Edited by Mukunda Ram Shastri. Bombay 1918.

in TS are summed up in *āhn*. VIII, the longest in the work. *Ahn*. IX, devoted to the various *nitya* and *naimittika* rites, corresponds to *āhn*. XX of the TS. In *āhn*. X the worship of the master is described, which is found in the final part of *āhn*. XX of the TS. The whole is followed by some closing stanzas.

We mentioned above some original features and variations, generally present in all Abhinavagupta's works, even in those which *ex professo* summarize, as was customary at the time, his more diffuse and complex works. We shall now take a look at some of them.

In *āhn*. V, that deals with the *āṇava-upāya*. Abhinavagupta distinguishes in the practice of *uccāra* a hundred and eight different moments, due to the three aspects (*unmiṣat, unmiṣita* and *saṃghaṭṭātmakībhūta*) present in each of the seven *viśrāntis* (3x7=21). In turn, each of these twenty-one moments is divided into five aspects depending on the intensity of penetration (*ānanda, udbhava, kampa, nidrā, ghūrṇi*) (21x5=105). The three *visargas* are to be added to these a hundred and five moments, so that the total number is a hundred and eight. This division into a hundred and eight is not referred to in the TĀ (Jayaratha himself does not mention it) nor in the TS. It occurs, however, in the TVDh II. 12b ff..

The description of initiation is different in the TU. The brief references to the *samayidīkṣā*, to which the longest *āhnikas* of the TS and the TĀ are devoted, are preceded by a brief description of the *kuladīkṣā*. that occupies the *āhn*. XXIX e XXII respectively in the TĀ and the TS. The introduction of the *kuladīkṣā*, at this point in the work, is evidently to show the importance that Abhinavagupta attributed to these secret rites, suitable only for few disciples, but important for the master, who through them could easily attain the state of psychic elation necessary to perform the various agamic rites for his disciples. As in the TS, Abhinavagupta summarizes again the stanzas on the *ādiyāga* occurring in the TĀ (*āhn*. XXIX), reducing the number to nine, plus two further *ślokas* drawn, with some modification, from the TĀ XXXII. 20c-24b and already quoted in the TS (p. 206). He says he is indebted to Śambhunātha for all of these.

A further peculiarity of this short work is the order in which Abhinavagupta puts the *parvadinas*, which does not begin with *mārgaśīrṣa* to finish with *kārttika* — as in the TĀ and the TS — but goes from *caitra* to *phalguna*. The reason why Abhinavagupta changed the traditional order[4]

[4] Cf. the passage quoted by Jayaratha (*Viveka ad* TĀ XXVIII. 36-40ab).

here (apart seeking variety) is not clear. At first, we were actually tempted to re-establish the *mārgaśīrṣa-kārttika* sequence, hypothesizing an inversion of folios in the archetype on which the extant MSS depend. Whatever the case may be, it does not change much.

As we mentioned earlier, the TU must have had a small circulation. To our knowledge, only three MSS of it have survived, only one of which is complete, and no direct or indirect evidence exists in the later literature[5]. K.C. Pandey is the only modern scholar who speaks of it, briefly, in his *magnum opus*. V. Raghavan, who just mentions the name of *Tantroccaya*[6], and N. Rastogi, who essentially paraphrases the words of his master[7], both depend on him more or less explicitly. In Pandey's opinion:

> «... the language, the style and the method of treatment of the subject-matter give rise to grave doubt about its being from the pen of Abhinava»[8].

As far as we are concerned, however, precisely the examination of the same elements considered by Pandey and, in addition, the very fluid way in which this short work is linked to the TS on the one hand and the TVDh on the other, in condensing the contents of the TĀ, induces us to ascribe it, without the slightest hesitation, to Abhinavagupta.

The reader will find a grave omission in this edition, namely the stanzas in *apabhraṃśa*, which for the most part repeat those in the TS[9]. The text of these stanzas, mostly very corrupt in all the MSS, is very uncertain, except for the first ones, which, in the edition of the TS, have a probably ancient sanskrit *chāyā*, but this, too, is not always reliable. We intend to make up for this omission with a separate study on the stanzas in *apabhraṃśa* written by Abhinavagupta, both at the end of the *āhnikas* of the TU and the TS, and in the *Parātriṃśikāvivaraṇa*.

[5] The TVDh is, on the contrary, quoted twice by Jayaratha (*Viveka ad* TĀ II. 2 and XIII. 120cd-121ab); see K.C. PANDEY, *Abhinavagupta. An Historical and Philosophical Study*, II ed., Varanasi 1963, p. 55.

[6] V. RAGHAVAN, *Abhinavagupta and his Works*, Varanasi 1981, p. 19.

[7] N. RASTOGI, *The Krama Tantricism of Kashmir*, vol. I, Delhi-Varanasi-Patna 1979, p. 159.

[8] *Op. cit.*, p. 75. Pandey does not explain how this conclusion was reached, nor, unfortunately, does he give any information about the MS, or the MSS, on which he based it.

[9] The omission is indicated in the text by three dots between square brackets.

THE MANUSCRIPTS

The MSS T and B, on which this edition is mainly based (L contains only a short fragment), belong to two different families. None of the most typical lacunas and errors in the one has its direct counterpart in the other. Everything considered, they seem to us equally authoritative — with a certain pre-eminence of the more complete T — and capable of integrating each other.

T Oriental Research Institute and Manuscripts Library, Trivandrum[10], No.17706-C. The MS is not in the printed catalogue[11] and is only mentioned in an old handwritten register of 'new' acquisitions for the Library's internal use. It is part of a codex containing the *Yogasūtravṛtti* of Bhojadeva (A), the *Tantrasāra* of Abhinavagupta (B) and, of the same author, the *Paramārthacarcā* (D) and the *Prabodhapañcadaśī* (E). The codex, in palm leaves, measuring cm. 4,8x33, is written in *grantha* characters (except for A, which, though apparently written by the same hand, is in *malayalam* characters), set on 10-11 lines, very tiny and elegant, not easy to decipher. It is not dated; according to P.L. Shaji, it is not less than three hundred years old. The palm leaves have become very dark, especially at the edges, from which fragments are missing here and there; in some places they have been eaten by insects. The *Tantroccaya* occupies eight folios (fifteen pages). The text, with the exception of some brief lacunas in the central part is complete and relatively correct. It begins with *gaṇapataye namaḥ* and ends with *iti śrīmanmāhāmāheśvarācāryābhinavaguptaviracite tantroccaye daśamam āhnikam*. Of the seven closing stanzas that precede the colophon, the first two (a *mālinī* and a *vasantatilakā*), in Sanskrit, are complete; in the third, in *apabhraṃśa*, in the fourth and fifth (two *triṣṭubhs*), in Sanskrit, there are some *akṣaras* missing due to fragments of leaf having

[10] We wish to extend our heartfelt thanks to Prof. G.B. Mohan Thampi (Vice-Chancellor of the University of Kerala), Dr. T. Bhaskaran (Director of the Oriental Research Institute and Manuscripts Library) and P.L. Shaji (MSS Assistant) for their warm reception and valuable help.

[11] *Alphabetical Index of Sanskrit Manuscripts in the Oriental Research Institute and Manuscripts Library, Trivandrum*, 4 vols., University of Kerala 1957-1986.

broken off; the text of the sixth and seventh (perhaps two *anuṣṭubhs*), also in Sanskrit, is corrupt.

B Banaras Hindu University Library, No. C1020 (Accn. No. 14/7634)[12]. The MS is on paper, in rather recent (18th-19th century) *śāradā* characters, consisting of fifteen folios (corresponding to the folios 27-41 of the whole codex), measuring cm. 18,2x14, with fourteen lines per page. It is less correct than T and has a few lacunas, some of which are marked by dots. It begins with *oṃ namo bhagavate vāsudevāya* and ends after the first of the seven closing stanzas, with *tantroccayaṃ samāptam*.

L This is the handwritten copy in *devanāgarī*[13] of a fragmentary MS in *devanāgarī* characters preserved in the Tagore Library, Lucknow (No. RS 180.414/A174T-45827), containing all the seventh *āhnika*, except for the last stanza in *apabhraṃśa*. It ends, like B, with the first of the closing stanzas (*aham abhinavaguptaḥ*... etc.), followed by *iti tantroccaye saptamāhnikam*.

RANIERO GNOLI and RAFFAELE TORELLA

[12] Cf. R.S. TRIPĀTHĪ, *Descriptive Catalogue of the Saṃskrit Manuscripts in Gaekwada Library, Bhārata Kalā Bhavana and Saṃskrit Mahāvidyālaya Library*, Banaras Hindu University, Varanasi 1971, p. 788.

[13] The copy was very kindly prepared by Dr. Navjivan Rastogi (Abhinavagupta Institute for Shaiva Philosophy and Aesthetics, University of Lucknow), to whom we express our grateful thanks.

तन्त्रोच्चयः

प्रथममाह्निकम्

[1]विमल[2]कलाश्रयाभिनवसृष्टिमहा [3]जननी
भरित[4]तनुश्च पञ्चमुखगुप्तरुचि[5]र्जनकः ।
तदुभययामलस्फुरितभावविसर्गमयं
हृदयमनुत्तरामृतकुलं मम संस्फुरतात् ॥ १ ॥

[6]परहितकरणनियुक्तो
गुरुभि[7]स्तन्त्रोच्चयमिति ग्रन्थम् ।
अभिनवगुप्तो रचयति
[8]मितमभिजनहृदय[9]विनोदि<नम्> ॥ २ ॥

1 The first verse occurs in TS p. 1.
2 *°kalā°*: *°kamala°* B
3 *jananī*: *rajanī* B
4 *°tanuś ca pañca°*: *tanur abhinava°* B
5 *janakaḥ*: *janaḥ* T
6 *parahita°*, our correction: *parihita°* T, B has only *yukto*.
7 *tantroccayam iti*: *tantroccayaṃ mita°* B
8 *mitam abhijana°*: *mimatijana°* T
9 *°vinodi<nam>*, our conjectural emendation: *°vinodi* B, *nirveśmi* T

[10]अज्ञानं किल बन्धहेतुरुदितः शास्त्रे

विपरीतविनिश्चयनिमित्तो हि संसारः । तथाहि ।

मलं तत्स्मृतम्

अज्ञानमेव हि मलम् । अतश्च

पूर्णज्ञानकलोदये तदखिलं निर्मूलतां गच्छति ।

अपूर्णे हि ज्ञाने यावत्येव [11]सम्यग्ज्ञानं तावती विमुक्तिस्तावति ज्ञेयीभुते तावदुत्तीर्णप्रमातृत्वावभासात् । पूर्णे तु ज्ञाने समस्तोत्तीर्णं समस्तात्मभूतं [12]च प्रमातृतत्त्वं शिवरूपमेव भातीति न कुत्रचिदंशभागे [13]ऽस्याज्ञानं स्यात् ।

ध्वस्ताशेष[14]मलात्मसंविदुदये मोक्षश्च

न त्वन्यत्किंचिन्मोक्षो नाम अपि त्वज्ञान[15]कालुष्यस्यापगमे सर्वोत्तीर्णसर्वात्मभूतपूर्णस्वतन्त्रनिर्मलसंवित्तत्त्वप्रकाश एव मोक्षः ।

[10] The verse, here intermixed with Abhinavagupta's comments, occurs in TS p. 5.

[11] *samyagjñānaṃ tāvatī*, our correction: *samyagajñānaṃ tāvatī* T, *saṃyagajñātatābhāvato* B.

[12] *ca*: omitted in T

[13] *'syājñānaṃ*, our correction: *'sya jñānaṃ* B, *'py ajñānavat* T

[14] *°malātmasaṃvidudaye mokṣaś ca- na tv anyat kiṃcin*: *°malā..saṃvidudayo…kiṃcin* B

[15] *°kāluṣyasyāpagame*: *°kāluṣyāmapagame* B

तेनामुना
शास्त्रेण प्रकटीकरोमि निखिलं यज्ज्ञेयतत्त्वं भवेत् ॥

[१६]तच्च परमेश्वरेण [१७]<षडर्ध>शास्त्रेष्वेव [१८]पूर्वं निरूपितं सर्वोत्तीर्णत्वस्य सर्वात्म[१९]भूतत्वस्य चाभिधानात् । ननु प्रकाशस्वभावो यद्ययं भगवांस्तत्कस्मादस्याज्ञानमप्रकाशात्मकम् । कथं वा तन्निवर्तते । आह

[२०]आत्मा प्रकाशवपुरे[२१]व शिवः स्वतन्त्रः

यस्मात् स्वरूपमाच्छाद्य प्रकटयति तत एवायं परमेश्वरः स्वतन्त्रः । स हि प्रकाशस्वभावः । अत एव केनापि [२२]चेदेकतमेन प्रकारेण न [२३]प्रकाशते तदप्रकाशता [२४]तथा स्यादिति सर्वात्मना स प्रकाशत इति प्रकाशतैव । [२५]स्वतन्त्रतास्य यच्च स्वरूपप्रकाशनम् ।

तच्चाक्रमात्

यस्य [२६]तदैव देहविलये शिवतैव

16 *tac ca*: *tadvat* T
17 *<ṣaḍardha>śāstreṣv*, our conjectural emendation: *ṣaḍaśāstreṣv* T, *śāstreṣv* B
18 *pūrvaṃ*: *pūrṇaṃ* T
19 °*bhūtatvasya*: °*bhūtasya* B
20 The verse occurs in TS p. 7.
21 *eva*: *eṣa* TS
22 *ced ekatamena*: *caikatamena* B
23 Instead of *prakāśate* one would expect *prakāśeta*
24 *tathā syād iti sarvātmanā*: *tathāsyācitsarvātma nāma* B
25 B adds *svatantraś ca*
26 *tadaiva*: *tad eva* T

क्रमवशादथवा त्रिभेदात् ॥

शाक्तादिरूपतयेति वक्ष्यामः । आह च

[...]

इति तन्त्रोच्चये प्रथममाह्निकम् ॥

द्वितीयमाह्निकम्

तत्र स [२७]परमेश्वरप्रकाशः कस्यचिदविरतप्रबन्धतया पुनरुपायनिरपेक्षतया भाति , [२८]एकवारं गुरुवचनमीदृशं सम्यग[२९]वधार्य। तद्यथा ।

[३०]उपाय[३१]जालं न शिवं प्रकाशयेत्

युक्तं चैतत् । यतः

घटेन किं भाति सहस्रदीधितिः ।

27 *parameśvaraprakāśaḥ: parameśvaraḥ svayaṃprakāśaḥ* T
28 *ekavāram: ekavāra°* T
29 *avadhārya: avadhāryam* T
30 The verse occurs in TS p. 9.
31 *°jālam: °jātam* T

अतः शिवप्रसादादेव [३२]विश्वं भाति । विश्वमध्ये समस्त उपायवर्गः ।

विवेचयन्नित्थमुदारदर्शनः
स्वयं[३३]प्रकाशं शिवमाविशेत् क्षणात् ॥

[३४]अनवच्छिन्नविश्वोत्तीर्णविश्वात्मभूतसंविद्रूपतया स्वयं [३५]प्रकाशत इति यावत् । आह च

[...]

इति तन्त्रोच्चये द्वितीयमाह्निकम् ॥

तृतीयमाह्निकम्

कस्यचित्तु परमेश्वरप्रकाशस्तदीयायां स्वातन्त्र्यशक्तौ [३६]निर्ज्ञातायां प्रकाशते । [३७]यदिदं विश्वं तत् प्रकाशते तावद्बहिः प्रकाशितमपि तु तदवश्यं परामृश्यते परामर्शेन

32 *viśvaṃ: śivaṃ* T
33 *°prakāśaṃ: °prakāśa°* T
34 *anavacchinna°: anavacchanna°* T
35 *prakāśata: prakāśa* T
36 *nirjñātāyāṃ: vijñātāyāṃ* B
37 T adds *sā ca svātmana evaṃ*, which seems a gloss.

विना प्रकाशितमप्यप्रकाशितकल्पं यतः, परामृश्यते च न बहिः परामर्शावसरे [38]ऽन्तर्मुखतोल्लासस्य संवेदनात्। अन्तश्चेत् परामृश्यते [39]ऽत्रैवैतत् स्फुरति बहिरपि प्रकाशमानम्, अन्यथा प्रकाशितं न परामृष्टं [40]स्यात् परामृष्टं [41]च न प्रकाशितं भवेत्। ततश्च [42]प्रकाशः परामर्श इत्युभयमप्यान्ध्यं भवेत्। एवं च प्रकाश-परामर्शस्वभावमेव संवेदनम्। [43]तदभिन्नाश्च [44]भावाः परामर्शबलाद्भिन्ना इव प्रतीयन्ते। [45]परामर्शात्मिका च परमेश्वरस्य पञ्चाशद्वर्णदेवतामयी अकृत्रिमा संकेतनिरपेक्षा शक्तिरिति स्वशक्त्यैव ममान्तर्विश्वं भाति। देवदत्तो ऽपि नामाहमेव संविद्रूपः, तदीयशरीरसुखादि तु मदीयवद्घटादिवच्च संवेदनदर्पणान्तर्भातीति सिद्धो ऽहंस्वातन्त्र्यशक्तिभासित[46]विश्वाभासः परमेश्वरो विभुरे[47]को नित्य इति मुहुर्मुहुर्भावयन् स एव। [48]यतः

[49]अन्तर्विभाति सकलं जगत्

क्व।

[38] *'ntar°: tan°* B

[39] *'traivaitat: tatra eva taiḥ* B

[40] *syāt: bhavet* T

[41] *ca* omitted in B

[42] *prakāśaḥ parāmarśa: prakāśaparāmarśa* T

[43] *tad°: tāvad* T

[44] *bhāvāḥ parāmarśabalād bhinnā iva: dava bhinnā iva* B

[45] *parāmarśa°: aparāmarśa°* T, the text of B has some lacunas: *parāmarśātmikā ca parameśvarasya pañcāśa... cchāmayakṛtima...nirapekṣā śaktir.*

[46] *°viśvābhāsaḥ: °cidābhāsaḥ* T

[47] *eko* omitted in T

[48] *yataḥ: yad ataḥ* T

[49] The verse occurs in TS p. 19.

आत्मनीह

[५०]स्वप्रकाशे। कथम् ।

[५१]यद्वद्विचित्ररचना [५२]मुकुरान्तराले ।

एतेन ग्राह्यग्राहकभावः कार्यकारणभावो नाश्यनाशकभाव आधार्याधारभाव इत्यादि सर्वं [५३]तत्रान्तर्भासमानं समर्थितम् । विचित्रावभासस्य मुकुरे ऽप्यस्य दृष्टस्य मुकुराद्भेदानुपपत्तेः । बोधस्य त्वेष विशेषः ।

[५४]बोधः परं निज[५५]विमर्शनसारवृत्त्या
विश्वं परामृशति

[५६]तत एव स्वप्रकाशः स्वतन्त्रश्च।

नो [५७]मुकुरस्तथा तु ॥

अन्यं प्रति [५८]हि स प्रकाश्यः परामर्शनीयश्चेति परतन्त्रो जडः । आह च

50 *svaprakāśe: svaprakāśam* B
51 *yadvadvicitra°: yadvicitra°* T
52 *mukura°: makura°* B (this is the form that occurs almost constantly in the *śāradā* MSS)
53 *tatra: svatantra°* B
54 *bodhaḥ param* (see TS p. 19): *bodhaḥ punar* B, *paren (sic)* T
55 *vimarśanasāravṛttyā: vimarśarasānuvṛttyā* TS p. 19 (the reading B T equally satisfies both meaning and metre)
56 *tata eva: para eva* T
57 *mukuras: makuras* B
58 *hi* omitted in B

[...]

इति तन्त्रोच्चये तृतीयमाह्निकम् ॥

चतुर्थमाह्निकम्

यस्य त्वित्थम[५९]प्यविकल्पकः [६०]समावेशो नोदेति [६१]स [६२]सविकल्पकभावनया सत्तर्करूपया संस्कुरुते [६३]विकल्पम् । विकल्पश्च संसारोचितेभ्यो विकल्पेभ्यो [६४]विपरीतस्वभावश् चेत् प्रबन्धेन प्रवृत्तो भवति, तत् सा पारमेश्वरी शुद्धविद्या शक्तिरेव । न तत्र [६५]विकल्पतया शङ्कितव्यम् । तथा हि

[६६]यो निश्चयः पशुजनस्य जडो [६७]ऽस्मि

देहमात्रस्वभावो ऽहमिति मत्वा । तथा

59 *api* omitted in B

60 *samāveśo: samāveśe* B

61 We restore *sa* omitted in B T (due to haplography)

62 *savikalpakabhāvanayā sattarka°: savikalpabhāvanayā mantratarka°* T

63 We restore *vikalpam*, most likely dropped in B T due to haplography.

64 *viparītasvabhāvaś cet prabandhena: viparītaḥ svabhāvataś cet prabandha°* T

65 *vikalpatayā: vikalpaḥ tayā* T

66 This verse, here intermixed with the commentary, and the verse which follows occur in TS p. 32.

67 *'smi: 'smin* T

कर्मसंपाशितो[६८]ऽस्मि

देहव्यतिरिक्ते ऽपि सत्यात्मनि । तथा

मलिनो [६९]ऽस्मि

क्षीनेषु कर्मस्वपि मलयोगात् । तथा

परेरितो ऽस्मि ।

[७०]मलप्रक्षयो ऽपि मम नादिशिवप्रसादात् । इत्येवं लौकिको वा धार्मिको वा रुद्रभूतो वा सिद्धान्तदर्शनमुक्तो [७१]वापि पशुरेव । स च [७२]‹तथाविधामुकामुक›विकल्पदार्ढ्यबलात् । अतश्च

इत्येतद[७३]न्यदृढनिश्चयलाभसिद्ध्या

नाहं जडः संविन्मात्रस्वभावत्वात् । न मम कर्माणि पाशः, तानि मम प्रत्युत स्वातन्त्र्यात् क्रियाशक्ति[७४]विजृम्भामात्रम् । नाहं मलिनः, मलो हि मम स्वात्मप्रच्छादनात्मिका क्रीडा ।

68 *'smi: 'smin* T

69 *'smi: 'smin* T

70 *malaprakṣayo 'pi mama nādiśivaprasādāt: malaṃ pratyapi sa pānādi* B

71 *vāpi: vā* B

72 <*tathāvidhāmukāmuka*>°, our conjectural emendation: *tathāvidhasukasuka*° B, *tathāvidhasvakasvaka*° T

73 °*anya*°: °*anu*° T

74 °*vijṛmbhā*°: °*vijṛmbha*° T

नाहं परेरितः । न [75]मत्तः परः कश्चिदस्ति पूर्णसंविदेक-परमार्थत्वादित्ये[76]व ।

सद्यः पतिर्भवति विश्ववपुश्चिदात्मा ॥

यथा यथा निश्चय ईदृगाप्यते
[77]तथावधेयं परयोगिना सदा ।
न वस्तुयाथात्म्यविहीनया दृशा
विशङ्कितव्यं शिशुदेशना[78]गणैः ॥

तेन यत्किंचित् [79]कुर्वता ईदृङ्निश्चयलाभे ऽवधातव्यम् । आह च

[...]

इति तन्त्रोच्चये चतुर्थमाह्निकम् ॥

पञ्चममाह्निकम्

एवमनन्तरेण शाक्त उपायो दर्शितः । यस्तु सत्तर्केण न निर्मलस्वभावमासादयति तस्य ध्यानादिकमुच्यते । तत्र

75 *mattaḥ paraḥ: matta varaḥ* B
76 *eva: evaṃ* T
77 *tathāvadheyam* (see TS p. 32): *tathā vidheyaṃ* B T
78 *°gaṇaiḥ: °guṇaiḥ* T
79 *kurvatā: kurvata* T

[80]स्वप्रकाशं समस्तात्म[81]तत्त्वं मात्रादिकं त्रयम् ।
[82]अन्तःकृत्य [83]स्थितं ध्यायेद्धृदयानन्दधामनि ॥
तद्द्वादशमहाशक्तिरश्मिचक्रेश्वरं विभुम् ।
व्योमभिर्निःसरद् ध्यायेद् [84]बाह्ये सृष्टयादिभासकम् ॥
तद्ग्रस्तसर्वबाह्यान्तर्भावमण्डलमात्मनि ।
[85]विश्राम्येत् पुनरप्येवमित्यभ्यासात् प्रथात्मनः ॥

इति ध्यानमु[86]क्तम् । तच्च बुद्धिलक्षणेना[87]णुना भेदनिश्चयात्मनैव कृतमित्याणवम् । कश्चित् प्राणो[88]च्चारणक्रमेण स्वरूपलाभमेति । तत्र [89]स्वभावे पूर्वं बोधात्मनि [90]आक्रान्त्या प्राणस्तिष्ठति । ततोऽसौ प्राण उल्लसति । मेयं पूरयति । तत्रैकीभवति । [91] मेयमुपसंहर्तुमारभते । संहृत्य पूर्णीभवति । षडेता आनन्दभूमीरनुसंधत्त इति सप्त

80 These three verses occur in TS p. 37 and, with some modification, in TVDh II 8-10.

81 °*tattvaṃ*: *tattva*° B

82 *antaḥ*°: *ataḥ* B

83 *sthitaṃ*: *sthitiṃ* B

84 *bāhye*, our correction (on the basis of TS p. 37 *vyomabhir niḥsarad bāhye dhyāyet sṛṣṭyādibhāvakam*, TVDh II. 9cd *vyomabhir niḥsarad bāhye dhyāyet sṛṣṭiṃ sthito dadhat*; cf. also TĀ V. 28ab *vyomabhir niḥsaraty eva tattadviṣayagocare*): *bāhya*° T, the whole *ardhaśloka* is omitted in B.

85 Cf. TVDh II. 10cd *viśrāmyet punar apy evaṃ dhyānābhyāsāt prathātmanaḥ* and TS p. 37 *viśrāmyan bhāvayed yogī syād evaṃ svātmanaḥ prathā*.

86 *uktam* omitted in B

87 *aṇunā*: *aṇutā* T

88 °*uccāraṇakrameṇa*: °*uccāra<kra>meṇa* T

89 *svabhāve pūrvaṃ*, our correction (cf. TĀ V. 44ab *nijānande pramātraṃśamātre hṛdi purā sthitaḥ*, TS p. 38 *tatra prāṇam uccicārayiṣuḥ pūrvaṃ hṛdaya eva śūnye viśrāmyati*, TS p. 41 *pūrvaṃ svabodhe tadanu prameye viśrāmya*, TVDh II. 11ab *prāṇo bodhamayaḥ pūrvam tata ullasati sphuṭam*): *svabhāve pūrva*° b, *svabhāvena pūrvaṃ* T

90 *ākrāntyā*: *ākrāntyāṃ* B

91 *meyam*: *so'yam* B

विश्रान्तयः । [९२]प्रत्येकं च विश्रान्तावभ्यासेन तस्या विश्रान्तेर्यत्तद्रूपं तदुन्मिषद्रूपमुन्मिषितरूपं [९३]सङ्घट्टात्मकीभूतमिति त्रित्वम् । तदेव विसर्ग[९४]त्रयं व्यक्तादिलिङ्गत्रयं च । तत्रापि प्रत्येकं प्रवेशतारतम्यादानन्द उद्भव [९५]कम्पो निद्रा घूर्णिरित्यवस्था उत्तरोत्तरव्याप्त्युदयात् । त्रयश्च [९६]प्रधानं विसर्गादयो योगिनीहृदयानन्दसंप्रदायलभ्या इत्यष्टोत्तरशत-[९७]भेदेयमुच्चारणभूमिः । तत्रैव श्रीसृष्टिसंहारबीजोदय इत्यलम् । एवं बुद्धिप्राणद्वारेण यः प्रवेशः स आणवः, प्रविष्टस्तु

[...]

इति तन्त्रोच्चये पञ्चममाह्निकम् ॥

षष्टमाह्निकम्

अधुनेदमभिधीयते । इह द्विविधं वैचित्र्यं लोकस्य भेदभ्रान्तिं करोति क्रिया[९८]कृतं मूर्तिकृतं च । तत एव कालदेशौ भेदकौ प्राहुः । तत्र क्रियाकृतं वैचित्र्यं [९९]स्वात्म-

92 *pratyekaṃ ca visrāntāv abhyāsena: pratyeke ca na viśrāntyāvabhyāsena* B

93 *saṅghaṭṭātmakībhūtam: sa…tyātmakībhūtam* B

94 *°trayam°: °traya°* T

95 *kampo: kampe* T

96 *trayaś ca pradhānaṃ visargādayo yoginī°*, our correction (cf. TVDh II; 14c *tatrāpi tritayaṃ mukhyam*): *trayaś ca pradhānavisargādayodinī°* B, *pradhānaṃ visargā yoganī°* T

97 *°bhedeyam uccāraṇa°: °bheda uccāraṇa°* T

98 *°kṛtam: °bhūtaṃ* T

99 *svātmavijṛmbhitam eva paśyati*: the text of T seems redundant, *svātmasvātantryavijṛmbhāmātraṃ <ma>nyate parayogī tadā kālakṛtaṃ vaicitryaṃ svātmavijṛmbhitam eva paśyati.*

विजृम्भितमेव पश्यति स्वप्नवत् संकल्पवच्च । तथाहि

> [१००]संविद्रूपस्यात्मनः प्राणशक्तिं
> पश्यन् [१०१]रूपं तत्रगं [१०२]चापि कालम् ।
> साकं सृष्टिस्थेमसंहारचक्रै-
> र्नित्योद्युक्तो भैरवीभावमेति ॥

संविदे[१०३]व हि प्रसरन्ती प्राणनारूपा सम्पन्ना सती [१०४]स्पन्दनोच्छलत्वात् काल[१०५]प्रसारमारभते । [१०६]इह प्राण-शक्तौ सकलं कालं विलापयेत् तां च संविदीति संविदः स्पन्दितमात्रमे[१०७]तद्यत् तदेव बहिःसृष्टिसंहारानन्त्यवैचित्र्यम् । आह च

[...]

एवं प्रक्षीणकालाशङ्कः कालग्रासं करोति । मूर्तिवैचित्र्यकृतो ऽपि यो ऽयं प्रपञ्चः स एव शरीरात्मना [१०८]भुवनात्मना च वर्तमानो भोक्तृत्वं [१०९]भोग्यत्वं भोगाधारत्वं

100 The verse occurs in TS p. 61.
101 *rūpaṃ: svapnaṃ* T
102 *cāpi kālaṃ: cātikālaṃ* TS p. 61.
103 *eva: evaṃ* B
104 *spandanocchalatvāt: spandanaśīlatvāt* T (the reading T, with its explanation of a grammatical character, is theoretically possible but does not fit this context)
105 *°prasāraṃ: °prasabhaṃ* T
106 *iha: iti* T
107 *etad* omitted in B
108 *bhuvanātmanā* omitted in B
109 *bhogyatvaṃ* omitted in B

भोगोपकरणत्वं [110]कुर्वाणं भेदमवभासयन्नद्वैतभावनां प्रतिहन्तीति [111]सो ऽपि स्वात्मन्येव संविद्रूप एकीभावेन भावनीयः । तथाहि । ब्रह्माण्डं प्रकृत्यण्डं चासंख्यभेदम् । तत्कारणं चैकैकरूपं मायाण्डं शक्त्यण्डमित्येतानि चत्वार्यण्डानि निःसंख्यैर्भुवनैर्भुवनाधिपतिभिश्च विचित्रैर्व्याप्तानि स्वात्महृदयदर्पणान्तः प्रतिबिम्बितानि [112]संपश्यंस्तत्रैव च लीनानि संवेदयमानस्तत एव [113]चोल्लासितान्यवलोकयन् विश्वात्मतां विश्वोत्तीर्णत्वं [114]विश्वकर्तृत्वं [115]विश्वज्ञातृत्वं विश्वव्यापकत्वं विश्वपूर्णत्वमखण्डितत्वं स्वतन्त्रत्वं संविद्रूपत्वं चा[116]त्मनो जानात्येव । आह च

[...]

इति तन्त्रोच्चये षष्टमाह्निकम् ॥

सप्तममाह्निकम्

तत्र भुवनजातस्य [117]समस्तस्य तत्त्वमात्ररूपत्वं स्वभावः तानि च षट्त्रिंशद्वेद्यभूमिपतितानि । संविद्रूपं तु सप्तत्रिंशम् ।

110 *kurvāṇam: kurvāṇo* T, equally possible
111 *so: svo* T
112 *sampaśyaṃs: paśyaṃs* T
113 *collāsitāny*, our correction: ull*āsitāny* B, coll*āsitān* T
114 *viśvakartṛtvam: viśvakarmatvam* B
115 *viśvajñātṛtvam*, our correction: *viśvajñānatvam* B, omitted in T
116 *ātmano* omitted in B
117 *samastasya* omitted in T

तदप्युपदेशादौ वेद्यमुपचारेणे[११८]ति सर्वथा यदवेद्यं स्वतन्त्रं तदष्टात्रिंशम् । तान्येतानि सर्वतत्त्वानि [११९]सर्वस्थितानि । तथाहि। देहे यत्कठिनं तद्धरा । [१२०]यत्स्रवं तदापः । यदुष्णं तत्तेजः । यत्स्पन्दनं तन्मरुत् । यत्सावकाशं तन्नभः। तेष्वेव पञ्चसु [१२१]सुसूक्ष्मरूपत्वादनुद्भिन्नविभागा गन्धरसरूपस्पर्श-शब्दतन्मात्राणि, तद्ग्राहीणि पञ्चेन्द्रियाणि घ्राणं [१२२]रसनं चक्षुस्त्वक् श्रोत्रमिति [१२३]निजनिजव्यापारं कुर्वन्ति । पञ्चकर्मेन्द्रियाणि देहव्यापकानि विशिष्टेषु स्थानेषु स्फुटानि । तद्यथा । [१२४]वाक् पाणिः पादः पायुरुपस्थं जल्पनं ग्रहणं गमनमु[१२५]त्सर्गो विसर्ग आनन्देन स्वात्मानि विश्रमणमित्येषामसाधारणा व्यापाराः । संकल्पकारि मनः, निश्चयकारिणी विकल्पप्रतिबिम्बधारिणी बुद्धिः, एतावत्यभिमानकार्यहंकारः । एषां कारणं [१२६]गुणाः, तेषां [१२७]साम्यावस्था प्रधानम् । तद्व्यतिरिक्तो भोक्ता पुरुषः । [१२८]तस्य विशिष्टविषय[१२९]सक्तिजनको रागः । क्वचिद्विषये योजनिका नियतिः । बुद्धिं तत्प्रतिबिम्बितं च वस्तु यया

118 *upacāreṇeti sarvathā*: *upacāreṇa nirvasadhā* T

119 *sarvasthitāni* omitted in B

120 *yat sravaṃ*: *ya<d> dravaṃ* T, equally possible

121 *susūkṣma°*: *sūkṣma°* T L

122 *rasanam*: *rasanā* B

123 *nijanija°*: *nijanijaṃ* T

124 *vāk pāṇiḥ pādaḥ pāyur upasthaṃ*: *vākpāṇipādapāyūpasthaṃ* B, *vāk pāṇiḥ pādaḥ pāyūpasthaṃ* L

125 *utsargo visarga ānandena*: *visargo visagrānandena* T

126 L adds *sattvādayo*

127 *sāmyāvasthā*: *yā sāmyāvasthā* T, *ādyāvasthā sāmyāvasthā* B

128 *tasya*: *tad°* B

129 *°sakti°*, our correction: *°śakti°* L, *°mukti°* B, *°rajanako* T

पश्यति सास्य विद्या । यया किंचित्करणसमर्थो भवति सास्य कला । [130]येन भूतभविष्यद्वर्तमानतया [131]स्वस्वरूपमाकलयन् भावानपि तथाकलयति सो ऽस्य कालः । इयतो वेद्यकलापस्या[132]द्यं कारणं माया । ययास्य पुरुषस्य स्वरूपं प्रकाशयितुं प्रारभ्यते सास्य शुद्धविद्या । यस्यामवस्थायां स्फुटानेतानर्थान् स्वात्मन्यभेदेन पश्यत्यहमेते पदार्था इति सास्येश्वरावस्था । यस्यां तु ताने[133]वास्फुटीभूतान् [134]प्रध्वंसमानानिवाहमे[135]ते इत्यभेदेन पश्यति सास्य सदाशिवा[136]वस्था । [137]यया स्वरूपैकीभूतांस्तानसद्रूपान् संपन्नान् पश्यति सास्य शक्त्यवस्थानाश्रितशून्यातिशून्याख्या । यस्यां तु स्वरूपमेव शुद्धं भाति सास्य शिवा[138]वस्था । यया समग्रमेतद्वैचित्र्यं परामृश्यते सास्य पूर्णावस्थेत्येवं षट्त्रिंशत्तत्त्वात्मकत्वं प्रमातृतत्त्वस्य प्रमेयस्यापि तेन सह तादात्म्या[139]पत्तौ प्रमेयत्वादित्ये[140]वं विश्वं सर्वं सर्वतः पूर्णं पश्यन्नद्वय एव भाति । स्वशक्त्या च विश्वं भेदयन्नेकमपि

130 *yena: yato* T, *yo* L

131 *svasvarūpam: svaṃ svarūpam* T, *svaṃ svaṃ rūpam* L

132 *ādyam: ādyādyaṃ* B, *ādyaka°* T

133 *evāsphuṭībhūtān: evaṃ sphuṭībhūtān* B, *eva sphuṭībhūtān* L (but also these readings would be acceptable, if we take *sphuṭībhūtān* as referring to *īśvaratattva*)

134 *pradhvaṃsamānān ivāham ete ity abhedena paśyati: nāham ete ity abhede'pi pradhvaṃsamānān iva paśyati* L

135 *ete: etad* T

136 *°avasthā* then corrected to *°daśā* B L

137 T omits the passage which follows and continues with *yasyāṃ samagram*.

138 *°avasthā: °avastheti* L

139 *°āpattau: °apapatti°*

140 *evaṃ: eva* T L

घटरूपं पदार्थमसङ्ख्यभेदभिन्नं पश्यति । [१४१]तद्यथा । घटो ऽयं मया ज्ञातः, [१४२]चैत्रेण चक्षुषा ज्ञातः, [१४३]सो ऽहमस्य ज्ञातः, सो ऽन्येन ज्ञातः, एषो ऽपि [१४४]सर्वज्ञैर्ज्ञातः, भगवता [१४५]परमशिवेन ज्ञातः। एते च वस्तुधर्मा एव[१४६] तथैवाध्यर्यमानत्वाच्चित्रार्थक्रियाकारित्वाच्च । तस्मादात्माधीनं भेदाभेदा[१४७]वभासवैचित्र्यं पश्यन्नात्मानं सर्वोत्तीर्णं सर्वात्मानं [१४८]च पश्येत् परमेश्वरीभूतम् । अतश्च

[१४९]भूम्यादौ तत्त्वजाले न हि भवति वपुस्तादृशं यत् [१५०]प्रमातुः
संविद्विश्रान्तिवन्ध्यं [१५१]स्फुरति स बहुधा [१५२]मातृभावो ऽस्य यस्मात् ।
तेनास्मिन्वेद्यजाले क्रमगतकलनां [१५३]निर्विकल्पाम् [१५४]अहन्ता-

141 The passage from *tad yathā* to *vastudharmā eva* is omitted in L and added later in the upper margin.

142 *caitreṇa cakṣuṣā jñātaḥ* omitted in T L

143 *so'ham asya jñātaḥ so'nyena jñātaḥ* omitted in T

144 *sarvajñair: sarvajñena* T, *sarvajño* L

145 *paramaśivena jñātaḥ: paramaśivajñānataḥ* T

146 L adds *bhedabhinnāḥ* (in the upper margin)

147 °*avabhāsa*°: °*ābhāsa*° T

148 *ca: tu* T

149 The verse occurs in TS p. 108.

150 *pramātuḥ: pramāntaḥ* T

151 *sphurati* (see TS p. 108): *bhavati* B T

152 *mātṛbhāvo: pramātṛtāto* B

153 *nirvikalpām: niṣṭhakalpāṃ* T

154 *ahantā*°: *ahantāṃ* T

स्वातन्त्र्यामर्शसारां भुवम[155]धिवसत प्राप्नुत स्वात्म-
सत्ताम् ॥[156]

आह च

[...]

इति तन्त्रोच्चये सप्तममाह्निकम् ॥

अष्टममाह्निकम्

एतावद्यदुक्तं तत्कस्यचित् [157]प्रमातुर्गुरुवचनं विनैव [158]स्वयं प्रकाशते । कस्यचिद् गुरुवचसा । कस्यचित् [159]तु ज्ञानयोग्यत्वं न भवति । तथापि चैवंविध[160]स्वभ्यस्तज्ञानमहिम्नो गुरोः सकाशाद्दीक्षामासाद्य मुक्तिं लभते । एतावति च परमेश्वरस्यैव स्वातन्त्र्यं । तथाहि

[161]यथा निरर्गलो स्वात्मस्वातन्त्र्यात् परमेश्वरः ।
आच्छादयेत् परं धाम तथा विवृणुयादपि ॥

155 *adhivasata prāpnuta: adhivasati prāpnuta* T, *adhivasatat prāpyata* L

156 L adds here the first of the closing stanzas (*aham abhinavaguptah prārthaye sadvivekān...*), then *iti tantroccaye saptamāhnikam*.

157 *pramātur: prasādāt tu* T

158 *svayam* omitted in B

159 *tu: tat* T

160 °*svabhyasta*°: °*abhyasta*° B

161 The verse occurs in TS p. 128

अत ऐवानपेक्षक एव विचित्रः पारमेश्वरः शक्तिपातः । स्वातन्त्र्यादेव च क्वचित् परमेश्वरो गुरुशास्त्रमन्त्रदीक्षाविषयगर्हाक्रान्तहृदये ऽपि तदनुष्ठानमतिं ददाति यो ऽसौ तिरोहित इत्युच्यते । यथाह

[162]अप्रबुद्धे ऽपि वा धाम्नि स्वस्मिन्बुद्धवदाचरेत् ।

सो ऽपि च पुनरपि परमेश्वरेणा[163]नुगृह्येतापीत्युक्तं

भूयो बुद्ध्येत [164]वा सो ऽयं शक्तिपातो ऽनपेक्षकः ॥

आह च

[...]

एवं यो भगवच्छक्तिपातेन दीक्षाक्रमेण ज्ञानयोग्यः कृतस्तं प्रति दीक्षा वक्तव्या । तत्र चादौ स्नानमुद्दिष्टम् । स्नानं च कालुष्यस्यासंविद्रूपताभिमानस्य यदपासनं तदेव । तदुपयोगि तु यत्किंचिज्जलादिक्षालनं तदपि संवि[165]न्नैर्मल्यलेशहेतुतया भवतु स्नानम् । तदुपयोगित्वेनैव तत्र विधिः । आह च

[...]

162 The verse occurs in TS p. 128
163 *anugṛhyeta*: *anugṛhyato* T
164 *vā so 'yam*: *vāsau yat* T
165 °*nairmalya*°: °*nairmalyaṃ* B

एवं कृतस्नानो यदेव हृदयाह्लाददायि तदेव यागस्थानं गच्छेत् । तत्र स्थण्डिले [166]मण्डले [167]स्वशक्तिगुरुदेहचक्र-प्राणान्तरात्मसु वोक्तातिविस्तरपूर्णत्वोत्तीर्णत्वसंविद्रूपत्वतादात्म्यभावनात्मकानुत्तर[168]संस्कारसंस्कृतेषु देवताचक्रं वक्ष्यमाण-विधिनार्चयेत् । तत्र शक्तित्रयात्मा यो ऽसौ परमशिवः सप्तत्रिंशो भैरवस्तमप्युल्लङ्घ्य तमासनपक्षीकृत्याष्टा[169]त्रिंशत्तमी यासौ भगवती परसंविदुक्ता सैव [170]चण्डयोगीश्वर्यात्मिका विश्वग्राससृष्टिचक्रवाहिनी [171]द्वादशाभिर्मरीचिरूपाभिर्देवताभिः सह केवला वा विश्वाविभेदवृत्त्या [172]पूज्या । पूजाविधिस्त्वयं गुरु[173]वचनगम्यो योगिनीहृदयवक्त्ररूढः ।

[174]शक्तिस्तद्वदभिन्ना
[175]कार्यसहोद्भूतिहेतुरूपा सा ।

166 We would expect *yāmale* instead of *maṇḍale*, following the description of the *kulayāga* in TĀ XXIX. 7 *bahiḥ śaktau yāmale ca dehe prāṇapathe matau / iti sodhā kulejyā syāt pratibhedaṃ vibhedinī //* and TS p. 198 *tad anayā sthityā kulayāgaḥ, sa ca ṣoḍhā - bāhye śaktau svadehe yāmale prāṇe saṃvidi ca iti [...] tatra bāhyaṃ sthaṇḍilaṃ [...]*. The agreement of both MSS on this point has induced us, not without some doubt, to retain the reading *maṇḍale*, considering it a deliberate (though unaccounted for) variation by Abhinavagupta himself.

167 *sva°: tvaṃ* B

168 *saṃskārasaṃskṛteṣu devatā°: saṃskāraṃ saṃskṛte pradeśe devatā°* T

169 *°triṃśattamī: °triṃśatamā* T

170 *caṇḍayogīśvaryātmikā: caṇḍayogeśvarātmikā* T

171 *dvādaśābhir: dvādaśormir* B

172 *pūjyā | pūjāvidhis tv: pūjāvidhis tv* B

173 *°vacana°: °vadana°* T

174 The nine *āryās* which follow can be compared with TĀ XXIX. 100c-156b and TS pp. 201-205. These parallel verses — which are sometimes identical (or almost) with TU's verses — will be quoted in the footnotes only when utilised for modifying or integrating the readings of the MSS.

175 *kāryasahodbhūti°*, our correction (cf. TĀ XXIX. 102a *kāryahetusahotthā sā* and TS p. 201 *kāryahetusahotthatvāt*): *kāryamahodbhūti°* (correcting a previous reading not clearly decipherable) B, *kāyasahodbhūti°* T

अन्योन्योचितपूजा-
पूज्यानन्दान्तिकत्व[१७६]लाभः फलम् ॥ १ ॥
[१७७]निजनिजभोगाभोग-
प्रविकासमयस्वरूपपरिमर्शे ।
क्रमशोऽनुचक्र[१७८]<देव्यश्>
चिच्चक्रेशं च मध्यमं यान्ति ॥ २ ॥
अनुचक्रदेवतात्मक-
मरीचिसंपूर्णवीर्यमथ युगलम् ।
[१७९]उच्छलद्[१८०]<अन्योन्योन्मुखम्>
[१८१]<अनुचक्राण्यैक्येन>[१८२]समुच्छालयेत् ॥ ३ ॥
इत्थं युगलकमेतद्
गलितभिदासंकथं यदा तदैव ।
ध्रुवधामानुत्तरचिद्-
विसर्गसंघट्ट एष परः ॥ ४ ॥
शान्तोदितं विसर्ग-
द्वयमस्मात् [१८३]सूयते ऽत्र ये [१८४]द्वितये ।

176 °*lābhaḥ*, our correction: °*lābha*° B T

177 Cf. TĀ XXIX. 111b-112a e TS p. 202 *nijanijabhogābhogapravikāsinija(°pravikāsamaya° TS)svarūpaparimarśe // kramaśo 'nucakradevyaḥ saṃviccakraṃ hi madhyamaṃ yānti /*

178 °<*devyaḥ*>, our correction, which seems necessary on the basis both of the expected meaning and the comparison with TĀ and TS (cit. fn. 177): °*caryāc* B, °*caryāś* T

179 The third and fourth *pādas* are omitted in T.

180 *anyonyonmukham*, correction required by meaning and based on TĀ XXIX. 113c-114b *anucakradevatātmakamarīciparipūraṇādhigatavīryam // tacchaktiśaktimadyugam anyonyasamunmukhaṃ bhavati / : unmukham* B

181 *anucakrāṇy aikyena*, correction suggested by sense and metre (on the basis of the parallel text of TĀ XXIX. 115ab and TS p. 202 *kṣubhnāty anucakrāṇy api tāni tadā tanmayāni na pṛthak tu*): *anucakram aikyaṃ* B

182 *samucchālayet*, our correction: *samucchalayet* B

183 *sūyate: prasūyate* B

184 *dvitaye: dvitayaṃ* T

अनुसंदधति प्राच्यां
सत्तां [१८५]चैते ऽनवच्छिन्नाः ॥ ५ ॥
एत[१८६]त्रिविसर्गा[१८७]<न्तः-
परिमर्श>वीर्योपबृंहितमन्त्रः ।
ए[१८८]उदितं [१८९]वक्त्रे कृत्वा
[१९०]तत्तृप्त्या सिद्धिमुक्तिदं चक्रम् ॥ ६ ॥
[१९१]मध्यस्थनालगुम्फित-
सरोजयुगघट्टनक्रमादग्नौ ।
मध्यस्थपूर्णशशधर-
सुन्दरदिनकरकलौघसंघट्टात् ॥ ७ ॥

सृष्ट्यादिक्रममन्तः-
कुर्वंस्तुर्ये स्थितिं लभते ।
एतत्खेचरमुद्रा-
वेशे [१९२]ऽन्योन्यस्य शक्तिशक्तिमतोः ॥ ८ ॥
[१९३]अव्यक्तध्वनिराव-

185 *caite 'navacchinnāḥ*: *cete 'navacchinaḥ* B

186 °*tri*°: °*trividha*° T (though it is precisely °*trividha*° which occurs in the parallel passages in TĀ XXIX. 147c e TS p. 204, metre requires °*tri*° T)

187 <*antaḥparimarśa*> our conjectural emendation: °*anta*<*r*>*vimarśa*° B T, *contra metrum*; °*parimarśa*° is hypothesized on the basis of its occurring in the parallel passages (see fn. 186).

188 *uditaṃ*: *tad idaṃ* B

189 *vaktre*: *cakro* T

190 *tattṛptyā*: *tat kṛtvā* B

191 The first and second *pādas* are omitted in B

192 *'nyonyasya śakti*°, our conjecture — based on TĀ XXIX. 154d. The same verse occurs also in TS p. 205, but with the *varia lectio* (also possible) *'nyonyaṃ svaśakti*° — found also in MS no.17706-B (Trivandrum), in the same codex that contains the TU. We have preferred to follow the text of TĀ, since the latter seems to better satisfy the expected meaning (at least in TĀ and TS; TU, to condense, omits the hemistich which follows, thus rendering the whole passage much more opaque) and is explicitly confirmed by Jayaratha: *'nyonyaṃ ca śakti*° B, *'nyonyānandaśakti*° T

193 *avyakta*°: *avyakti*° T

स्फोटश्रुतिनादनादान्तैः ।
अन्युच्छिन्नानाहत-
परमार्थैर्मन्त्रवीर्यं तत् ॥ ९ ॥

[१९४]त्यक्ताशङ्को निराचारो नाहमस्मीति भावयन् ।
कर्णाक्षिमुखनासादिचक्रस्थं देवतागणम् ॥ १ ॥
[१९५]अन्तःस्थं देवताचक्रं ह्लादोद्वेगादि चिद्घने ।
ग्राहितारं सदा पश्यन् खेचर्या सिध्यति ध्रुवम् ॥ २ ॥

आर्यानवकश्लोक[१९६]द्वितयार्थं शम्भुनाथमुखकमलात् आप्तं [१९७]समामनन्तः सद्यः स्युर्भैरवा एव । एवमानन्द-कार्य[१९८]कारणैरेव परमेश्वरी सर्वाविभागमयी पूज्या । शक्त्यारूढेन च [१९९]जप्तव्यम् । [२००]अनन्तरं शिष्यं प्रवेश्य

[२०१]अध्वानमालोच्यसमस्तमन्तः
[२०२]पूर्णं [२०३]स्वमात्मानमथावलोक्य ।
[२०४]पश्येद् [२०५]अनुग्राहधिया द्विषट्क-

194 For the parallel text of these two *ślokas* see TĀ XXXII. 20c-24b e TS p. 206.
195 *antaḥstham devatācakram: antaḥsthadevatāsaṅgam* T
196 *°dvitaya°: dviyā[dhā?]rtham* T
197 *samāmanantaḥ: samāmantataḥ*
198 *°kāraṇair eva: °kāraṇenaiva* T
199 *japtavyam: japtavyā* T
200 *anantaram: antaram ca* B
201 *adhvānam ālocya samastam antaḥ* (see also TS p. 155): *adhvānas tam antaḥ* B
202 *pūrṇam: pūrṇa°* T
203 *svam ātmānam: svātmānam* B
204 *paśyed: paśyad* B
205 *anugrāha°*, our correction (see also TS p. 155): *anugrāhya°* B T

पर्यन्तमे[२०६]वं समयी शिशुः स्यात्[२०७] ॥

[...]

समयाश्चा[२०८]स्य देवगुरुशास्त्रो[२०९]पासनादयः स्वयमेव हृदये स्फुरेयुः, विततश्च वितताद वलोक्याः । इत्येषा [२१०]मन्त्र-देवतासंपत्तिप्रदा समयी दीक्षा । पुत्रक[२११]दीक्षा तु देहान्ते ऽपवर्गदायिनी । तत्र विधिः ।

[२१२]अन्तः समस्ताध्वमयीं[२१३]स्वसत्ताम्
बहि[२१४]श्च संधाय विभेदशून्यः ।
शिष्यस्य [२१५]धीप्राणतनूर्निजासु
तास्वेकतां संगमयेत् प्रबुद्धः ॥
शिष्यैकीभावं झटिति प्रपद्य
तस्मिन्महानन्दविबोधपूर्णे ।
यावत्स विश्राम्यति तावदेव
शिवात्मभावं पशुरभ्युपैति ॥

206 *evaṃ*: *eva* B
207 T adds *tathā*
208 *asya*: *anya*° T
209 °*upāsanādayaḥ*: °*prasādaya* T
210 *mantradevatāsampattipradā*, our correction (cf. TVDh III; 21b *mantradevatātādātmyadāyinī*): *tanmantradevatāsampattipradā* T, *tanmāpratipadā* B
211 °*dīkṣā tu*, our correction (cf. TVDh III. 23c-24a *pautrikī sā punaś caryāmātreṇa prāyaṇe yayā // paraṃ śivatvam abhyeti*): °*dīkṣānta* B, °*dīkṣā tad*° T
212 The two verses occur in TS p. 160.
213 *svasattāṃ*: *samantāṃ ca* B
214 *ca* omitted in B
215 *dhīprāṇatanūr nijāsu*, our correction (based on the reading of TS being the only one that satisfies both sense and metre): *prāṇitamūrtinijāsu* T, *dhīprāṇatattannijāsu* B

आह च

[...]

आसन्न[216]मृत्योरपि शक्तिपातादेवमेव दीक्षां कुर्यात् । [217]आह च

[...]

अत एव परोक्षस्य जीवतो ऽप्यनुसंधिबलादेव दीक्षां कुर्यात् । मृतस्य जालप्रयोगक्रमेण तद्विधिः[218] ।

[219]मूलाधारादुदेत्यप्रसृतसुविततानन्तनाढ्यध्वदण्डं
वीर्येणाक्राम्य नासागगनपरिगतं विक्षिपन् व्याप्तु-
मीष्टे ।
यावद्धूमाभिरामाप्रचिततरशिखाजालकेनाध्वचक्रं
संच्छाद्याभीष्टजीवानयनमिति महाजालनामा
प्रयोगः ॥

ये ऽप्यधरशासनस्था [220]उत्तमशासनानुष्ठानं वाधमशासनस्थाद् गृहीतवन्तस्ते यदा सम्यक्शक्तिपातबलात् सद्गुरुमुपासते [221]तदा तेषां पूर्वव्रताद्यपास्य समयित्वे पुत्रकत्वे वा

216 °*mṛtyor:* °*mṛtyur* T
217 *āha ca: ata āha* T
218 T adds *tu*
219 The verse occurs in TS p. 167
220 *uttama°: pratinovā(?) uttama°* T
221 *tadā tesāṃ pūrvavratādy apāsya: tad eteṣāṃ pūrvaṃ vratādy upāsya* T

प्राग्वदेव [२२२]नियोजनमिति लिङ्गोद्धारदीक्षा । यस्तु स्वभ्यस्तज्ञानः स चेत् स्वात्मनः सिद्धिं वाञ्छति [२२३]तत् साधकत्वे [२२४]ऽभिषेक्तव्यः, न चेत् परार्थसंपादनातिरिक्तकर्तव्यताभावादाचार्यत्वे नियोक्तव्यः । तत्र सर्वार्पणविश्वाध्वपूर्णमन्त्रदेवतासंविद्रसपूर्णकलशाभिषेकः । इहैतज्ज्ञाना[२२५]नुगृहीतानामन्त्येष्टिश्राद्धादिकं नोपयुज्यत इति [२२६]तन्मरणदिनं परं तत्सन्तानिनां पर्वदिनमिति । तत्र विशेषतः [२२७]पूजा चक्रतर्पणं च यथाविभवम[२२८]विकल्पम् । एवं परमेश्वरेच्छैव मोचिकेति [२२९]तदधिष्ठित आचार्यः शक्तिपाताधिष्ठिते तत [२३०]एव निर्विचिकित्सारूढिभाजने शिष्य एवं[२३१]प्रकारैरभीष्टसिद्धिं वितरेत् । यतः

[२३२]अनुग्रहपरः शिवो वशितयानुगृह्णाति यं
स एव परमेश्वरीभवति [२३३]नाम किं वाद्भुतम् ।
उपायपरिकल्पना ननु तदीशनामात्रकं
विदन्निति न शङ्कते [२३४]परिमिते ऽप्युपाये बुधः ॥

222 *niyojanam*, our correction: *prayojanam* B, *yojanam* T
223 *tat: tataḥ* T
224 *'bhiṣektavyaḥ* omitted in B
225 *°anugṛhītānām antyeṣṭi°: °gṛh ītānām anteṣṭau* T
226 *tanmaraṇadinaṃ paraṃ: tanmanadinaparaṃ* T
227 *pūjā: pūrṇa°* B
228 *avikalpam: avikalpyam* T
229 *tad°: tām* T
230 *eva nirvicikitsārūḍhibhājane*, our restoration: *eva nirvicikitsārūḍhatājane* B, *eva… rūḍhibhājane* T
231 *°prakārair: °prakāre* T
232 The verse occurs in TS p. 177.
233 *nāma: tatra* B
234 *parimite: parimito* B

आह च

[...]

इति तन्त्रोच्चये ऽष्टममाह्निकम् ॥

नवममाह्निकम्

लब्धदीक्षाको [२३५]ज्ञानसिद्ध्यपवर्गरूढिलाभनिमित्तं नित्यं नैमित्तिकं चोपसीत । स्वभ्यस्तज्ञानो ऽपि, ज्ञाना[२३६]भ्यास-[२३७]तारतम्यं यतश्चास्य परार्थम् । स्वयं [२३८]तु दृढप्रतिपत्ति-मात्रेणैव कृतार्थत्वात् । तत्र नित्यं संध्योपासनपूजनजप-स्वाध्यायगुरु[२३९]सेवादि , नैमित्तिकं तु [२४०]पर्वपूजादिकं पवित्रकादिविधिश्च । [२४१]नैमित्तिके मुख्यः कल्पः शाक्तमर्घपात्रं प्रतिवर्षं जन्ममध्ये ऽपि वा चर्यापूरणाय । अपूर्णचर्या मोक्षे विघ्नः । तत्र पर्वदिनानि प्रतिमासं

235 *jñānasiddhyapavarga°*: *°jñātasiddhāpavarga°* B
236 *°abhyāsa°*: *°ābhāsa°* B
237 *°tāratamyaṃ yataś cāsya*: *°tāratamyā yatatrāsya (sic)* T
238 *tu* omitted in T
239 *°sevādi*: *°devatādi* T
240 *parvapūjādikaṃ*, our correction: *pūrvapūjādikaṃ* B, *parvapūrvādikaṃ* T.
241 The passage from *naimittike* to *vighnaḥ* is omitted in T

[२४२]प्रथमपञ्चमे दिने [२४३]भवन्ति । [२४४]विशेषतस्तु [२४५]चैत्रे शुक्लत्रयोदशी दिनमध्यं बुधपूर्वफल्गुनीयोगः, वैशाखे कृष्णाष्टमी दिनमध्यं बुधश्रवणयोगः, ज्येष्ठे कृष्णनवमी मध्यं दिनं चन्द्रशतभिषग्योगः, आषाधे कृष्णप्रतिपन् मध्यं दिनं आदित्यमूलयोगः, श्रावणे कृष्णैकदशी पूर्वाह्नः शुक्ररोहिनीयोगः । भाद्रपदे शुक्लषष्टी दिनमध्यं बृहस्पतिविशाखायोगः, आश्वयुजे शुक्लनवमी दिनं सर्वं नात्र योगः, कार्त्तिके शुक्लनवम्यां रात्रेः [२४६]प्रथमो भागश्चन्द्रश्रवणयोगः, मार्गशीर्षे कृष्णनवम्यां रात्रेः प्रथमो भाग आदित्योत्तरफल्गुनीयोगः, पौषे कृष्णनवम्यां रात्रिमध्यं चन्द्रचित्रायोगः, माघे शुक्लपञ्चदश्यां [२४७]रात्रिमध्यं बृहस्पतिमघायोगः, फाल्गुने शुक्लद्वादशी मध्यं दिनं चन्द्रतिष्ययोगः । अग्रतिथिवेधस्त्वत्र विशेषतरः । त्रिधा दिनं रात्रिं च कृत्वा पूर्वमध्यापरभागो यागकालः । योग[२४८]सहितत्वे विशेषतः पूजाचक्रयागतर्पणम् । भागशो विशेषसम्भवे भागभागपूजया पूर्ण[२४९]यागो यजनं भवति ।

242 *prathamapañcame: prathamapañcama°* B

243 *bhavanti*, our correction: *bhavati vati* B, *viṣuvati* T

244 *viśeṣataḥ: viśeṣaḥ* T, equally possible

245 *caitre*, our correction: *caitra°* B T. *caitraśuklatrayodaśī dinamadhyaṃ* occurs in B T before *viśeṣataḥ* whereas it should belong to the following list of the *viśeṣaparvans*; therefore, we put it after *viśeṣatas tu*.

246 *prathamo bhāgaś candraśravaṇayogaḥ, mārgaśīrṣe kṛṣṇanavamyāṃ rātreḥ prathamo bhāga ādityottaraphalgunīyogaḥ: prathamo yogaḥ ādityottaraphalgunī* B

247 *rātrimadhyaṃ: rātriṃ* T

248 *°sahitatve: °sahite* B

249 *°yāgo*, our correction: *yāga°* B, T has *°yoga*, after which the MS is damaged and continues with *yāgalābhe* etc.

योगलाभे वेलाया असम्भवे योगो [250]बलीयान् । अनुयागकाललाभश्च मुख्य इत्येवं पर्वविधिः । अन्यान्यपि नैमित्तिकानि [251]<तद्>यथा गुरुगृहागमनं [252]तद्वर्गस्य च शास्त्रज्ञान[253]लाभो देवतादर्शनादिश्चेति । अथ पवित्रकविधिः । स च [254]विधिपूरकः परमेश्वराज्ञापूरकश्चेत्यवश्यमेव कर्तव्यः । स चाषढशुक्लात् कार्त्तिकान्तं कर्तव्यः । [255]माघान्ते दक्षिणायने ऽपि वा क्वचिदुक्तः । तद्विधिस्तु [256] यथासंभवं सौवर्णपट्टसूत्रपवित्रकादारभ्य दार्भमपि पवित्रकं वित्तशाठ्यपरिहारेणाध्वसंख्याग्रन्थिकं सर्वाध्वपरिपूर्णं भावयित्वा गुरुरर्पयेच्छिष्यार्थे ततो विशेषपूजनतर्पणदक्षिणादीन्येवं निंत्य[257]नैमित्तिके कुर्वाणस्याविलुप्तोत्साहस्य विनापि प्रमुख-ज्ञानयोग[258]धारया चर्यामात्रान् मुक्तिः ।

आह च

[...]

इति तन्त्रोच्चये नवममाह्निकम् ॥

250 *balīyān: balayān* T

251 *<tad>yathā*, our correction: *yathā* B, there is a lacuna in T due to the leaf being damaged (*naimittikāni…gṛha°*).

252 *tadvargasya*, our correction: *tadvargyasya* B T

253 *°lābho: °lābha°* T

254 *parameśvarājñāpūrakaś* omitted in B

255 *māghānte dakṣiṇāyane: māghāntaṃ dakṣiṇāyanam* T

256 B adds *vā*

257 *°naimittike: °naimittika* B

258 *°dhārayā: °cārayā* B

दशममाह्निकम्

इत्येवं गुरुवचनादधिगम्य सर्वथा गुरुर्भगवान् पूजनीयः । तत्र सुवर्णपूर्णपृथिवीदानेनापि न [२५९]गुरावनृणी भवतीत्युक्तं [२६०]तत्र तत्र [२६१]श्रुत्यन्तसिद्धान्ततन्त्रोत्तीर्णादिषु , किंतु सबाह्याभ्यन्तरमात्मपर्यन्तमर्पणं कृत्वा तत्रानृणी भवति । यावच्च गुरावनृणी [२६२]न सम्पन्नस्तावद[२६३]धिकारबन्धोऽस्य न निवर्तते । तस्मात् [२६४]सर्वथा [२६५]यागान्ते [२६६]वित्तशाठ्यविरहितेन [२६७]सकलत्रात्मनिवेदनान्तं गुरुः पूज्यो वन्द्यः परितोष्यः ।

येन येन प्रकारेण गुरुः संतोषमेत्यसौ ।
[२६८]⟨तेन तेन प्रकारेण⟩ प्रसीदेद्देवतागणः ॥

[२६९]इति ह्युक्तं संचारादौ । तदिमुक्तं वक्तव्यं यत्सर्वोत्तीर्णशास्त्राणां साररहस्यभूतमभिधेयम् ।

259 *gurāv anṛṇī bhavati* (or *anṛṇībhavati*): *gurāv anāṇibhāva* T
260 *tatra tatra: tatra* B
261 *śrutyantasiddhānta°: śūnye tat siddhānta°* B
262 *na* omitted in B
263 lacuna in B corresponding to *adhikāra°*
264 *sarvathā: sarvadhā* T
265 *yāgānte: cānte* B
266 *vittaśāṭyavirahitena: sāṭhyavivarjitena* B
267 *sakalatrātmanivedanāntam: sarvasvakalatrātmanivedanāntatayā* B
268 The third *pāda* is corrupt (*kāras tenāsau* B, *kāryaṃ prakāras tenāsya* T); the restoration proposed is the one appearing as the most immediate and reliable.
269 *iti hy uktaṃ saṃcārādau: iti kārādau* B

अहमभिनवगुप्तः प्रार्थये सद्विवेकान्
प्रणयिवचनभङ्गं ते ऽपि नालं विदध्युः ।
किमपि किमपि यद्वद्दूरमा[270]लोकयध्वं
[271]<पुरम्> इदमपि [272]तद्वद् <वस्तुतो> वेत्थ
पश्चात् ॥[273]

[274]संवित्प्रकाशपरमार्थतया यथैव
भात्यामृशत्यपि तथेति [275]<विवेचयन्तः ।
सन्तः समस्तमयचित्प्रतिभाविमर्श-
सारं समाश्रयत> शास्त्रमनुत्तरात्म ॥

आह च[276]

[...]

270 *ālokayadhvaṃ*: *ālokayadhve* T

271 *<puram> idam*, our conjectural emendation: *param idam* B L, *viramitam* T

272 *tadvad <vastuto>* (*<vāstuto>* ?), our conjectural emendation: *tadvad vastu tad* T, *tadvad āsritam* L, lacuna in B *tadvada…bhaṃ*

273 B ends at this point and adds: *tantroccayaṃ samāptam*

274 The verse occurs in TS p. 197.

275 In T a fragment of leaf, approximately equivalent to eighteen *akṣaras*, is missing; T continues with *śāstram* etc. The conjectural restoration of the missing portion is based on TS p. 197, where the same verse occurs.

276 The last folio of T, which is the only extant source for this last part, is damaged. Of the first line (after *āha ca*), only some almost illegible *akṣaras* remain; they constitute the beginning of the *apabhraṃśa* verse occurring in TS p. 197. Considering the average number of *akṣaras* in each line, we can say that the first line had, after the *apabhraṃśa* verse, about

[+++++++++]तन्त्र-
राद्धान्तशास्त्राण्यधिगम्य सम्यक् ।
श्रीशम्भुपादाब्जनिषेवणेन
नियुक्तचित्तो ऽभिनवप्रधानः ॥
चित्रा[२७७][++++++

++++++++++] ।
आलोक[२७८]सारो द्वयभिन्नमेतत्
तन्त्रं त्रिधा [२७९]व्याकुरुते स्म [२८०]गुप्तम् ॥

इति तन्त्रोच्चयमेनं भावयति दिवानिश[२८१][...] ॥

इति श्रीमान्महामाहेश्वराचार्याभिनवगुप्तविरचिते तन्त्रोच्चये दशममाह्निकम् ॥

277 A fragment of leaf corresponding nearly to twenty *akṣaras* is missing. As showed by the metre of the subsequent portion, those twenty *akṣaras* constituted, together with *citrā*, the first two *pādas* of a second *triṣṭubh*.

278 One might hypothesize a correction to °*sāra*°, which, however, only the missing portion of the *āryā* would have been able to confirm.

279 *akṣara* not clearly decipherable (*vyā-pyā?*).

280 Correction to *guptaḥ*?

281 The subsequent passage is corrupt. We limit ourselves to transcribe it: *nasiyoyaṃsambhavatibhairavavibhairavivavibhussipra*[three *akṣaras* missing]*na*